# ॥ દેવકૃતા બ્રહ્મસ્તુતિઃ ॥

.. Brahmastuti by Devas ..

sanskritdocuments.org

August 20, 2017

# .. Brahmastuti by Devas ..

## ॥ દેવકૃતા બ્રહ્મસ્તુતિઃ ॥

## Sanskrit Document Information

Text title : brahmastutiH devakRitA

File name : brahmastutidevakRitA.itx

Category : deities_misc, brahma

Location : doc_deities_misc

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Subrahmanyam Yvs yvspmp at gmail.com

Proofread by : Subrahmanyam Yvs, Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : matsyapurANam adhyAyaH 154 shlokAH 7-15

Latest update : July 21, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ દેવકૃતા બ્રહ્મસ્તુતિઃ ॥

ત્વમોઙ્કારોઽસ્યઙ્કુરાય પ્રસૂતો વિશ્વસ્યાત્માનન્તભેદસ્ય પૂર્વમ્ ।
સમ્ભૂતસ્યાનન્તરં સત્ત્વમૂર્તે સંહારેચ્છોસ્તે નમો રુદ્રમૂર્ત્તે ॥ ૧॥

વ્યક્તિં નીત્વા ત્વં વપુઃ સ્વં મહિમ્ના તસ્માદણ્ડાત્ સ્વાભિધાનાદચિન્ત્યઃ ।
દ્યાવાપૃથિવ્યોરૂર્ધ્વખણ્ડાવરાભ્યાં હ્યણ્ડાદસ્માત્ત્વં વિભાગં કરોષિ ॥ ૨॥

વ્યક્તં મેરૌ યજ્જનાયુસ્તવાભૂદેવં વિદ્વસ્ત્વત્પ્રણીતશ્ચકાસ્તિ ।
વ્યક્તં દેવા જન્મનઃ શાશ્વતસ્ય દ્યૌસ્તે મૂર્ધા લોચને ચન્દ્રસૂર્યૌ ॥ ૩॥

વ્યાલાઃ કેશાઃ શ્રોત્રરન્ધ્રા દિશસ્તે પાદૌ ભૂમિર્નાભિરન્ધ્રે સમુદ્રાઃ ।
માયાકારઃ કારણં ત્વં પ્રસિદ્ધો વેદૈઃ શાન્તો જ્યોતિષા ત્વં વિમુક્તઃ ॥ ૪॥

વેદાર્થેષુ ત્વાં વિવૃણ્વન્તિ બુદ્ધ્વા હૃત્પદ્માન્તઃ સન્નિવિષ્ટં પુરાણમ્ ।
ત્વામાત્માનં લબ્ધયોગા ગૃણન્તિ સાઙ્ખ્યૈર્યાસ્તાઃ સપ્ત સૂક્ષ્માઃ પ્રણીતાઃ ॥ ૫॥

તાસાં હેતુર્યાષ્ટમી ચાપિ ગીતા તસ્યાં તસ્યાં ગીયસે વૈ ત્વમન્તમ્ ।
દૃષ્ટ્વા મૂર્તિં સ્થૂલસૂક્ષ્માં ચકાર દેવૈર્ભાવાઃ કારણૈઃ કૈશ્ચિદુક્તાઃ ॥ ૬॥

સમ્ભૂતાસ્તે ત્વત્ત એવાદિસર્ગે ભૂયસ્તાં તાં વાસનાં તેઽભ્યુપેયુઃ ।
ત્વત્સઙ્કલ્પેનાન્તમાયાપ્તિગૂઢઃ કાલો મેયો ધ્વસ્તસઙ્ખ્યાવિકલ્પઃ ॥ ૭॥

ભાવાભાવવ્યક્તિસંહારહેતુસ્ત્વં સોઽનન્તસ્તસ્ય કર્ત્તાસિ ચાત્મન્ ।
યેઽન્યે સૂક્ષ્માઃ સન્તિ તેભ્યોઽભિગીતઃ સ્થૂલા ભાવાશ્ચાવૃતારશ્ચ તેષામ્ ॥ ૮॥

તેભ્યઃ સ્થૂલૈસ્તૈઃ પુરાણૈઃ પ્રતીતો ભૂતં ભવ્યં ચૈવમુદ્ભૂતિભાજામ્ ।
ભાવે ભાવે ભાવિતં ત્વા યુનક્તિ યુક્તં યુક્તં વ્યક્તિભાવાન્નિરસ્ય ॥

ઇત્થં દેવો ભક્તિભાજાં શરણ્યસ્ત્રાતા ગોપ્તા નો ભવાનન્તમૂર્તિઃ ॥ ૯॥

ઇતિ દેવકૃતા બ્રહ્મસ્તુતિઃ સમ્પૂર્ણા ।

matsyapurANam adhyAyaH 154 shlokAH 7-15

Transliterated by Subrahmanyam Yvs yvspmp at gmail.com/
Proofread by Subrahmanyam Yvs, Malleswara Rao Yellapragada malleswararaoy at yahoo.com

.. Brahmastuti by Devas ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*